संस्कृत वार्ता:

दिनाङ्क : 26/11/2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र-मोदी प्रावोचत् यत् विगतदशके सर्वकारेण कर्तव्यस्य उपरि विशेषं बलम् दत्तम्,सः सप्तचत्वारिंशदधिक-द्विसहस्रतमं वर्षं यावत् विकसित-भारतस्य निर्माणार्थं संविधानस्य भावम् अवलम्ब्य सामूहिक-रूपेण कार्यं कर्तुं नागरिकान् आहूतवान् ।
- गृहमन्त्रिणा अमितशाहेन निगदितं यत् संविधानं केवलं शासन-सञ्चालनस्य मार्गदर्शिका-पुस्तिकायाः अपेक्षया अधिकमस्ति, अनेन नागरिकेषु संवैधानिक-मूल्यानां प्रसारस्य महत्त्वमपि प्रकाशितम्।
- कृषि-एवं-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः अवोचत् यत् भारतं द्विसहस्रतमस्य पञ्चविंशे षड्विंशे च वर्षे अष्टसप्तत्यधिक-त्रिशत-मिलियन्-टन्-परिमितात् अधिकम् ऐतिहासिकं खाद्यान्नोत्पादनं प्राप्तवत् ।
- अष्टोत्तर-द्विसहस्रतमस्य नवम्बर्-मासस्य षड्विंशति-दिनाङ्के मुम्बई-आतङ्कवादि-आक्रमणे दिवङ्गतेभ्यः निर्दोषजनेभ्यः सर्वोच्च-बलिदानं दत्तवद्भ्यः सुरक्षा-कर्मिभ्यश्च देशः अद्य श्रद्धाञ्जलिम् अर्पयति ।
- सप्तपञ्चाशत्तमः भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः अद्य गोवा-राज्ये चलच्चित्र-जगतः महानायकेभ्यः श्रद्धाञ्जलिभिः, विशेषज्ञ-प्रशिक्षण-सत्रैः , विशेष-चलच्चित्र-प्रदर्शनैश्च सह स्वकीयं सप्तमं दिवसम् आचरति ।

<u>पीएम-लेखः</u>

प्रधानमन्त्रिणा नरेन्द्र-मोदिना उक्तम् अस्ति यत् विगत-दशके सर्वकारेण कर्तव्ये अथवा नागरिक-कर्तव्येषु विशेषावधानं दत्तम् । सः अवदत् यत् भारतीय-सभ्यतया सर्वदा समाजस्य प्रत्येकस्याः भूमिकायाः अनुरूपाणां दायित्वानाम् उपरि ध्यानं दत्तम् । अद्य संविधान-दिवसावसरे आङ्ग्ल-भाषायां हिन्दी-भाषायां च दैनिक-वार्तापत्रेषु प्रकाशिते स्वकीये लेखे श्रीमोदी अवदत् यत्

स्वच्छ-भारताद् आरभ्य जल-संरक्षणं तथा पर्यावरण-संरक्षणं यावत् अनेकेषु जनान्दोलनेषु कर्तव्यभावः अभिव्यक्तः । प्रधानमन्त्रिणा नागरिकाः संविधानस्य भावम् अवलम्ब्य सप्तचत्वारिंशदधिक-द्विसहस्रतमं वर्षं यावत् विकसित-भारतस्य निर्माणार्थं सामूहिक-रूपेण कार्यं कर्तुम् आहूताः। सः एकोनपञ्चाशदधिक-एकोनविंशतिशततमे वर्षे संविधानस्य स्वीकरणस्य स्मरणं कृत्वा, राष्ट्रिय-प्रयासेषु भारतं प्रथम-स्थाने स्थापयितुम् आग्रहम् अकरोत्। सः अवोचत् यत् संविधानस्य महत्त्वं संसदः न्यायालयान् च अतिक्रम्य नागरिकाणां, विशेषतः यूनां सामूहिक-चेतनायाः अभिन्नः भागः भवितुम् अर्हति। सः अवदत् यत् नवम्बर्-मासस्य षड्विंशति-दिनाङ्कं संविधान-दिवसत्वेन आचरितुं निर्णयस्य उद्देश्यं संविधानेन सह जनानां सम्बन्धं सुदृढीकर्तुम् आसीत्। श्रीमोदिना आरोपः कृतः यत् विपक्षः मुस्लिम-जनानां कृते आरक्षणं प्रवर्तयितुम् अन्य-वञ्चिण-वर्गेभ्यः प्रदत्तम् आरक्षणं न्यूनीकर्तुं प्रयतते। सः अवदत् यत् विपक्षस्य बृहत्तमः पक्षः ओ.बी.सी.-आरक्षणं न्यूनीकर्तुं मुस्लिम-आरक्षणं च आनेतुम् इच्छति इति अत्यन्तं भयावहम् अस्ति, यस्य संविधान-निर्मातारः, विशेषतः डॉ. बाबासाहेब-अम्बेडकरः, सर्वथा विरुद्धम् आसन्।

प्रधानमन्त्री 'मन की बात' कार्यक्रमः

प्रधानमन्त्री नरेन्द्र मोदी अस्य मासस्य एकोनात्रिंशत् दिनाङ्के रविवासरे प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य अस्य आकाशवाणी-कार्यक्रमस्य एतत् चत्वारिंशदधिकैक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि कार्यक्रमः आकाशवाणी-वार्ता-विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्री-कार्यालय-सूचना-प्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति ।हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्या क्षेत्रीयासु भाषासु अपि भविष्यति।

अमितशाहः - संविधान-गौरव-दिवसम्

गृहमन्त्री अमितशाहः अवदत् यत् संविधानं न केवलं शासनस्य मार्गदर्शकपुस्तकम् अपितु राष्ट्रस्य आशाः, आकांक्षाः, मूल्यानि च प्रतिबिम्बयति। अद्य सायं नवदिल्ली-नगरे संविधान-गौरव-दिवसम् सम्बोधयन् श्रीशाहः अवदत् यत् संविधानस्य सम्मानं सर्वेषां भारतीयानां कृते अतीव महत्त्वपूर्णं गौरवपूर्णं च दायित्वम् अस्ति। सः अवदत् यत्, एतत् दुर्भाग्यम् अस्ति यत् स्वातन्त्र्यानन्तरं, संविधानस्य केवलं प्रशासनं सञ्चालनाय मार्गदर्शकपुस्तकरूपेण गणयितुं प्रयासः कृतः, तथा च देशस्य किशोर-युव-नागरिकेषु तस्य भावस्य प्रतिष्ठापनस्य सुदृढीकरणस्य च प्रक्रिया विस्मृता। गृहमन्त्री उक्तवान् यत्, पञ्चदशाधिक-द्विसहस्रतमे वर्षे प्रधानमन्त्रिणा नरेन्द्रमोदिना निर्णयः कृतः यत् प्रतिवर्षं नवम्बर-षट्विंशति-दिनाङ्कः संविधानदिवसत्वेन आचर्यते, येन संविधानस्य सर्वोच्चमूल्यानि प्रत्येकस्मिन् विद्यालये, महाविद्यालये, सर्वेषु नागरिकेषु च प्रापयितुं शक्यते।

कृषि-मन्त्री शिवराजसिंह

कृषि-एवं-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः पञ्चविंशत्यधिक-द्विसहस्र-षड्विंशतितमे वर्षे भारते अष्टसप्तत्यधिक-त्रिशत-मिलियन्-टन्-परिमितात् अधिकम् ऐतिहासिकं खाद्यान्नोत्पादनं प्राप्तम् इति सूचितवान् । सः अवदत् यत् गत-वर्षस्य अपेक्षया अस्मिन् अष्टोत्तर-द्विशत-लक्ष-टन्-परिमिता वृद्धिः अभवत्। अद्य नवदिल्ल्यां संवाददातृ-सम्मेलनं सम्बोधयन् श्रीचौहानः एतत् अपि प्रकाशितवान् यत् भारतेन निरन्तरं द्वितीये वर्षे अपि विश्वस्य प्रमुख-तण्डुल-उत्पादकस्य स्थानं सुरक्षितं कृतम् । सः अवोचत् यत् देशस्य समग्रं तण्डुलोत्पादनं पञ्चपञ्चाशदधिक-एकशत-मिलियन्-टन्-स्तरम् अतिक्रान्तम्, यत् गत-वर्षस्य तुलनायाम् एकोनपञ्चाशत्-दशमलव-सप्त-शून्य-लक्ष-टन्-परिमितं वर्धितम् ।

26/11-वार्षिकी

अष्टोत्तर-द्विसहस्रतमस्य वर्षस्य नवम्बर्-मासस्य षड्विंशति-दिनाङ्के मुम्बई-आतङ्कवादि-आक्रमणे दिवङ्गतान् निर्दोषान् जनान् देशः अद्य स्मरति, अथ च सर्वोच्च-बलिदानं दत्तवद्भ्यः सुरक्षा-कर्मिभ्यः श्रद्धांजलिम् अर्पयति। अद्य लश्कर-ए-तैयबा-सङ्गठनस्य दशभिः शस्त्रास्त्र-युक्तैः आतङ्कवादिभिः समग्रे मुम्बई-नगरे अनेक-स्थानेषु कृतानां समन्वित-आक्रमणानाम् अष्टादश वर्षाणि पूर्णानि ।

प्रायः षष्टि-होराः यावत् प्रचलितेषु एतेषु आक्रमणेषु ताज-महल्-पैलेस्-होटल् ओबेरॉय-ट्राइडेण्ट्, छत्रपति-शिवाजी-टर्मिनस्,नरीमन्-हाउस् च इत्येतानि प्रमुख-स्थानानि

लक्ष्यीकृतानि आसन्। अस्मिन् आक्रमणे आहत्य षट्षष्ट्यधिकैकशतं जनाः प्राणान् अत्यजन्, त्रिशताधिकाः च आहताः अभवन्। अस्मिन् अभियाने नव आतङ्कवादिनः निहताः, यदा अजमल-कसाबः जीवितः गृहीतः, यः अनन्तरं दोषसिद्धः भूत्वा मृत्युदण्डेन दण्डितः अभवत् ।

इयं वार्षिकी आतङ्कवादस्य विरुद्धं सतर्कं स्थातुं अथ राष्ट्रिय-सुरक्षां सुदृढीकर्तुम् आवश्यकतायाः स्मरणम् अपि कारयति। आतङ्कवादं प्रति असहिष्णुता-नीतौ भारतस्य प्रतिबद्धता तस्य विकसति आतङ्कवाद-निरोधक-संरचनायां प्रतिबिम्बिता भवति। अस्य वर्षस्य फेब्रुवरी-मासे गृह-मन्त्रालयेन भारतस्य प्रथमा व्यापक-राष्ट्रिय-आतङ्कवाद-निरोधक-नीतिः रणनीतिश्च प्रहार आति अनावरिता। इयं संरचना निवारणं , त्वरित-प्रतिक्रिया , संस्थानां मध्ये समन्वयः , अन्तराष्ट्रिय-सहयोगः , अथ च पुनर्निर्माणं प्रतिरोधक-क्षमता च इत्येतान् सप्तस्तम्भान् केन्द्रीकरोति।

<u>चलच्चित्र-महोत्सवः</u>

सप्तपञ्चाशत्तमः भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवः अद्य गोवा-राज्ये चलच्चित्र-जगतः महानायकेभ्यः श्रद्धाञ्जलिभिः विशेषज्ञ-प्रशिक्षण-सत्रैः, विशेष-चलच्चित्र-प्रदर्शनैश्च सह स्वकीयं सप्तमं दिवसम् आचरति। महोत्सवे अद्य श्रद्धाञ्जलि-विभागस्य अन्तर्गतं वरिष्ठस्य अभिनेता नाना-पाटेकर-महोदयस्य प्रशंसित-चलच्चित्रस्य दीक्षा -इत्यस्य विशेष-प्रदर्शनस्य माध्यमेन सः सम्मानितः अभवत्। पाटेकर-महोदयस्य कोगा-चरित्रस्य अभिनयं स्मरन् महोत्सवस्य निदेशकः

आशुतोष-गोवारीकरः मौनस्य माध्यमेन अपि भावान् अभिव्यक्तुं अभिनेतायाः अस्याः अद्भुत-क्षमतायाः प्रशंसाम् अकरोत्। अद्य प्रख्यातेन पात्र-चयन-निदेशकेन चलच्चित्र-निर्मात्रा च मुकेश-छाबड़ा इत्यनेश पात्र-चयनस्य विषये एकं विशेषज्ञ-प्रशिक्षण-सत्रम् अपि सञ्चालितम्।अनेक-सफल-चलच्चित्रेषु स्वकीयात् अनुभवात् सः स्वर-परीक्षण-प्रक्रियायाः, नूतन-प्रतिभानाम् अन्वेषणस्य , अथ च पात्रस्य निदेशकस्य च दृष्टिकोणेन सह सर्वाधिकम् अनुकूलानाम् अभिनेतॄणां चयनस्य विषये विचार-विमर्शम् अकरोत्। महोत्सवस्य ज्ञान-विनिमय-कार्यक्रमे अकादमी-पुरस्काराणां विषये एकं विशेषज्ञ-प्रशिक्षण-सत्रम् अपि आयोजयिष्यते, एतत् प्रतिष्ठित-अन्ताराष्ट्रिय-पुरस्काराणां वैश्विक-चलच्चित्र-उद्योगस्य च विषये सूक्ष्म-अन्तर्दृष्टिं प्रदास्यति।

।। इति वार्ता: ।।